# अर्थवत्त्वविमर्शः

जगन्नाथशर्मा
सहप्राध्यापकः - नव्यव्याकरणम्
ने.सं.वि., महेश-संस्कृत-गुरुकुल-विद्यापीठम्, देवघट्टः नेपालः
jagannathsharma9847@gmail.com

Article History : Received - 13 April 2026, Reviewed - 03 May 2026, Accepted - 15 June 2026
DOI : https://doi.org/10.3126/ss.v4i05.96256

## लेखसारः

प्रकृतोऽयं लेख: " अर्थवदधातुरप्रत्यय: प्रातिपदिकम्" इति सूत्रम् आधारीकृत्य प्रस्तुतो विद्यते। अस्मिन् लेखे सर्वादौ प्रातिपदिकस्य संज्ञाया: विधायकस्य सूत्रस्य अर्थवदधातुरप्रत्यय: प्रातिपदिकमित्यस्य सङ्क्षेपत: अर्थस्य वर्णनं विधाय तत्र विद्यमानस्य अर्थवत्त्वस्य पदार्थस्य निरूपणं प्राधान्येन प्रस्तुतं विद्यते। तस्य अङ्गत्वेन केचन विषया अन्येऽपि यथा अप्रत्यय इति पदस्य आवृत्ति:, नञ: पर्युदास: अर्थ:, उत प्रसज्य प्रतिषेध:, इत्यादयो विषया: निरूपिता सन्ति। अथ च इह सूत्रे यत् अर्थवत्त्वम् तत्र प्राचीनानां नवीनानां च शाब्दिकानां मते भेदा:, इह सूत्रे उत्तरस्मिन् च सूत्रे एकविधमेव अर्थवत्त्वं स्वीक्रियते, उत अन्यादृशम् इत्यादयो विचारा विचारिता सन्ति। तत्र अर्थवत्त्वस्य निरूपणस्य प्रसङ्गे विविधानां सन्दर्भानां ग्रन्थानां समाश्रयणेन प्राधान्यत: परिष्कारं समवलोक्य परिष्कारोऽयं प्रकाशित इति लेखस्य अस्य मुख्यम् उद्देश्यं विद्यते। विविधेषु व्याख्यानेषु तत् चर्चितम् अपि कठिनत्वात् सारल्यस्य अभावात् च न सुगमतां यातीत्यत: तस्य याथातथ्येन अवगतिरेव एतस्य असाधारणं प्रयोजनं विद्यते। अथ सूत्रे प्रत्येकं पदानां प्रयोजनानि विचारितानि येन प्रतिपदं सूत्रं सार्थकतां गच्छति, एवञ्च अर्थवत्त्वस्य स्वरूपस्य प्राधान्येन निरूपणम्, तस्य व्याजेन च विचारान्तराणामपि विशेषतोविमर्शनेन सूत्रमिदं सर्वत: सुस्पष्टतां याति।

**शब्दकुञ्जी :** अधातुः, अप्रत्ययः, अर्थवत्त्वम्, प्रातिपदिकम्, संज्ञा।

## विषयपरिचयः

संस्कृतवाङ्मये छन्दसां प्रधानं मुखस्थानीयमङ्गं व्याकरणमुच्यते। भारतवर्षीयज्ञानविज्ञानात्मके जगति महामुनिविरचितस्य पाणिनीयव्याकरणस्य किमप्यलौकिकं महत्त्वं विद्यते। तत्रापि परिष्कारशैली अद्भुतप्रभावोत्पादिका स्वर्णे सुगन्धोद्भाविकेव सम्मन्यते। यथा सम्मार्जनेन पात्रस्य मलमपाक्रियते, तथैव सूत्रेषु परिष्कारद्वारा सम्भावितदोषाणां निरासो भवति। अस्याः प्रभावः सर्वेषु शास्त्रेषु समाक्रान्त इति सर्वप्रसिद्धमेव। तत्र प्रथमं व्याकरणशास्त्र एवास्याः प्रभावो द्रष्टव्यः।

यथा महर्षिणा पाणिनिना अष्टाध्यायी विरचिता। तस्यां प्रातिपदिकसंज्ञाविधायकम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"(पा.सू.१.२.४५) कृत्तद्धितसमासाश्चेति (पा.सू.१.२.४६) इति सूत्रद्वयं वर्तते अव्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा पूर्वसूत्रेण भवति। तत्र पूर्वसूत्रघटकस्यार्थवत्पदस्यार्थो विचार्यते। अत्रार्थप्रकृतेर्मतुप्प्रत्ययः, मस्य वत्त्वविधानमेव

सिद्धान्तितम् । "अर्थाच्चासन्निहिते"(कात्यायनवार्तिकम्.५७९४) इत्यनेन असन्निहितधनवाचिनोऽर्थशब्दादेव इन्प्रत्ययविधानात्, अर्थशब्दयोस्सदा सन्निहितत्वेन इनेरप्राप्तिः । तदुक्तं भाष्ये "असन्निहिते, इति किमर्थम् "अर्थवान्"(महाभाष्यवचनम्, पा.सू.५.२.१३५) इति। इत्थमत्र लक्षणे वृत्त्याऽर्थविषयकबोध-जनकत्त्वरूपमर्थवत्त्वं गृहीतमिति प्राचीनाः । तद्बीजमादायैव विवदन्ते तत्तन्मतानुयायिनः । यथा यद्यपि पूर्वसूत्रे "अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्र यदर्थवत्पदं वर्तते, उत्तरसूत्रे "कृत्तद्धितसमासाश्चेत्य-स्मिन्नपि तदनुवर्तते । तथापि प्राचीनवैयाकरणैः श्रीमद्भट्टोजिदीक्षितप्रभृतिभिः पूर्वसूत्रस्थापेक्षयाऽत्र सूत्रस्यार्थवत्पदे किमप्यर्थवैलक्ष्यण्यं दर्श्यते । यद्यपि अस्यार्थवत्त्वस्य व्याख्या बहुभिर्विपश्चिद्भिर्यथामत्या पृथक्पृथक्टीकामाध्यमेन विभिन्नपुस्तकेषूद्घोषिता वर्तते । तथापि तस्यात्यन्तक्लिष्टत्वाद् गम्भीरार्थवाहकत्वाच्च मन्दमस्तिष्काणां सुकुमारमतीनां हिताय न भवति । अतस्तत्सर्वं काठिन्यं संलक्ष्य विद्वद्भाषाभाषित एवार्थश्छात्रोपकारिण्या शैल्याततप्रमोदायार्थलापने सौकर्याय पूर्वसूत्रस्थसमस्तपदं विगृह्य ततोऽन्यसामान्यार्थं विविच्य पश्चादर्थवत्परिष्कारोऽत्र विमृश्यते ।

**शोधसमस्याः**

प्रकृतलेखे निम्नाः समस्या भवन्ति ।

क) इह सूत्रे प्रत्ययपदं सकृत् श्रुतमपि कथमर्थद्वयं निर्वक्ति ?

ख) प्राच्यनवीनरीत्या सूत्रेऽस्मिन् विद्यमानम् अर्थवत्त्वं कीदृशम् ?

ग) पर्युदासेनैव सिद्धे अर्थवत्पदं किमर्थम् ?

**शोधोद्देश्यम्**

प्रकृतशोधस्य उद्देश्यानि इमानि सन्ति -

क) सकृतच्छुतस्यापि अप्रत्ययपदस्य आवृत्यादिना विविधार्थप्रत्यायकत्वावगमनम् ।

ख) प्राचीननवीनसिद्धान्तानुगुणं सूत्रस्थार्थवत्त्वस्य परिष्करणम् ।

ग) पर्युदासेनैवार्थवत्त्वे लब्धेऽपि तद्ग्रहणस्यासाधारणप्रयोजनावगतिः इति ।

**शोधविधिः**

प्रकृतशोधः "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"(पा.सू.१.२.४५) इति सूत्रस्थार्वत्त्वविषयकः प्राधान्येन व्याख्यानात्मकं विश्लेषणात्मकञ्च विधिमाश्रयते ।

**विषयविश्लेषणम्**

**अर्थवत्त्वविमर्शः**

अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, इतीदं पाणिन्यष्टाध्याय्यां प्रथमाध्यायस्य द्वितीयपादे स्थितं पञ्चचत्त्वारिंशत्तमसंख्याकं सूत्रमस्ति । अर्थवद्, अधातु, अप्रत्ययः, प्रातिपदिकम् इति तत्र चतुर्धा पदविभागोऽस्ति । अर्थोऽस्यास्तीत्यर्थदित्यत्र नपुंसकत्वश्रवणाच्छब्दस्वरूपमित्यध्याहियते, तथा च अर्थवतः शब्दस्वरूपस्य सूत्रमिदं

प्रातिपदिकसंज्ञां विधत्ते। तत्र त्याज्यभागाः प्रत्ययाः प्रत्ययान्ताः धातवश्च वर्तन्ते। अत एव तत्र न धातुरिति अधातुः, न प्रत्ययः इति अप्रत्ययः, इति क्रमशः विग्रहवाक्यानि। पुंस्त्वन्तु तत्पुरुषत्वात् परवल्लिङ्गत्वेन। उत्तरसूत्रस्थं तद्धितपदं व्यर्थीभूय ज्ञापयत्यत्र अप्रत्ययः इति पदमावर्त्य प्रत्ययान्ततदादिभिन्नत्वमपि तदर्थो वक्तव्यः । न केवलं प्रत्ययभिन्नत्वमात्रमिति । अर्थवतः शब्दस्वरूपस्य प्रातिपदिकसंज्ञाया उदाहरणं धनवनादिकम् । यद्यपि अणादिप्रत्ययानामपि अपत्याद्यर्थवत्त्वात् हरिषु, करोषि इत्यादौ प्रत्ययान्ततदादित्वेऽपि अर्थवत्त्वस्याव्यभिचारात् प्रातिपदिकत्वापत्तिरासीत्तदिदानीमप्रत्ययग्रहणेन वार्यते । एवमेव केवलेभ्यः स्वादिप्रत्ययेभ्यः, क्रियावाचकत्वेनार्थवत्त्वाद्धातुभ्यश्च प्रातिपदिकसंज्ञाप्रयोज्यस्वादयः प्रत्ययाः न भवन्ति । अन्यथा अहन् इत्यादौ नलोपापत्तिः स्याद्। अतः तद्वारणायाधातुरित्युक्तम्।

**अप्रत्ययपदार्थः**

ननु पूर्वमुक्तमेकेन ‘अप्रत्ययः’ इति पदेन उभयोरपि लाभः । प्रत्ययस्य, प्रत्ययान्तस्य चेति । यद्यपि अप्रत्ययघटकस्य प्रत्यमात्रबोधकप्रत्ययशब्दस्य श्रवणात्, प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम् (परिभाषेन्दुशेखरः,प.सं.२३) इति परिभाषाया उपस्थितौ आवृत्तयोर्मध्ये प्रथमस्याप्रत्ययपदेन न प्रत्ययः इति विग्रहेऽपि द्वितीयेनाप्रत्ययघटकेन प्रत्ययपदेन प्रत्ययप्रकृत्याद्यवयवप्रत्ययचरमावयवकसमुदायस्य ग्रहणात् प्रत्ययान्ततदादिभिन्नं शब्दस्वरूपं प्रातिपदिकसंज्ञकं भवतीत्यर्थः सिद्ध्यति । तथापि संज्ञाविधौ प्रत्ययग्रहणे न तदन्तग्रहणमिति (परिभाषेन्दुशेखरः,प.सं.२७) प्रत्ययग्रहणपरिभाषायाः अपवादभूता परिभाषात्र न सञ्चरति। तस्य न्यायस्य निषेधस्तु ‘तरप्तमपौ घः’(पा.सू.१.१.२२) इत्यादिषु यत्र संज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकं पदं तिष्ठति तत्रैव प्रवर्तते। धर्मिग्राहकमानाज्ज्ञापकसाजात्यात् ‘सुप्तिङन्तं पदम्’ (पा.सू.१.४.१४) इति सूत्रिते सुप्तिङोः प्रत्ययात् तदन्तस्य पदसंज्ञायां सिद्धायां सूत्रेऽस्मिन्नन्तग्रहणं व्यर्थं सत् संज्ञाविधायके सूत्रे प्रत्ययमात्रबोधकेन पदेन तदन्तग्रहणाभावं ज्ञापयति। अर्थात् यत्र साक्षात् प्रत्ययस्य संज्ञा विधीयते तत्रैव प्रवर्तते । अत्र तु न साक्षात्प्रत्यस्य संज्ञा विधीयते । अपि तु प्रत्ययभिन्नस्यार्थवतः एव साक्षात् प्रातिपदिकसंज्ञा अङ्गीक्रियत इति कृत्वा तन्निषेधात्राप्रवृत्तौ धातुभिन्नं प्रत्ययभिन्नं प्रत्ययप्रकृत्याद्यवयप्रत्ययचरमावयवसमुदायभिन्नमर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं भवतीति सूत्रार्थः फलति।

‘राम’ इत्ययं संज्ञाशब्दोऽव्युत्पन्न इति यदा स्वीक्रियते, एवं ‘डित्थः/डवित्थः’ इत्यादीनामौणादिकानामव्युत्पन्नत्वं यदोच्यते तदानेन शास्त्रेणैषां प्रातिपदिकसंज्ञा भवति। यदि ‘रमन्ते योगिनो यस्मिन्निति’ विग्रहेण रामशब्दोऽधिकरणघञन्तः, डित्थडवित्थादयो व्युत्पन्ना इत्युच्यते तदा प्रत्ययान्तत्वा ‘अप्रत्ययः’ इति पर्युदासेन नैते शब्दाः सूत्रास्योदाहरणानि भवितुं शक्नुवन्ति। तदा बहुपटवः इत्युदाहरणम्। ईषदूनाः पटव इत्यर्थे ‘पटु+जस्’ इति जसन्तात्पूर्वत्र ‘विभाषा सुपो बहुच् पुरस्तात्तु’(पा.सू.५.३.६८) इत्यनेन बहुचि प्रत्यये सति अनेन प्रातिपदिकत्वे जसो लुकि चितः इति सप्रकृते बहुपटुशब्दस्यान्तोदात्तत्वे पुनर्जसि बहुपटवः इति मध्योदात्तं पदम्। प्रातिपदिकत्वाभावे तु अन्तोदात्तत्वापत्तिः। न च एवं बहुच्पूर्वप्रातिपदिकमित्येवास्तु इति वाच्यम्, तथा सत्युत्तरसूत्रे समासग्रहणस्य नियमाकत्वानुपपत्त्या मूलकेनोपदंशमित्यत्र दोषापत्तेः। अप्रत्ययपदावृत्त्या प्रत्ययपर्युदासे मानन्तु ‘सात्पदाद्योः’ इत्यत्र साद्ग्रहणमेव। अन्यथा प्रत्ययपर्युदासाभावे ‘सात्पदाद्योः’(पा.सू.८.३.१११) इति सूत्रे सातिप्रत्ययस्य ग्रहणं व्यर्थं स्यात् । ‘कृत्स्नं गृहमग्निः सम्पद्यते’ इत्यर्थे ‘विभाषा साति कार्त्स्न्ये’(पा.सू.५.४.५२) इति अग्निशब्दात् सातिप्रत्यये ‘अग्निसाद्भवति’ इति सिद्ध्यति । अत्र इकारात्परस्य सातिप्रत्ययावयवसकारस्य ‘आदेशप्रत्यययोः’(पा.सू.८.३.५९) इत्यनेन प्राप्तं षत्वं ‘सात्पदाद्योः’ इति

सूत्रेण निषिध्यते। प्रातिपदिकविधिसूत्रे प्रत्ययपर्युदासाभावे सातेः प्रातिपदिकत्वात् ततः विभक्त्युत्पत्तौ पदादित्वादेव तदवयवसकारस्य षत्वनिषेधः सिद्धेत्। एवं सातिग्रहणं व्यर्थं सत् प्रत्ययपर्युदासे ज्ञापकं भवितुमर्हतीति। तेन 'हरिषु', 'करोषि' इत्यादौ न षत्वनिषेधः । कैश्चिदत्र व्यपदेशिवद्भावेन प्रत्ययान्तत्वात् केवलप्रत्ययस्यापि न प्रातिपदिकत्वमित्युक्तम्, तन्न। असहाय एव व्यपदेशिवद्भावात् प्रत्ययग्रहणपरिभाषायाः षत्वाच्च, अन्यथा तत्र सुप्सिपोः सुबन्तत्वात् पदत्वापत्तिः। पुनरपि विचिकित्सा जायते पूर्वोक्तकारणेन तर्हि प्रत्ययस्यैव पर्युदासः स्वीकार्यः, परिभाषा चात्र विषये बाध्यते इति चेन्न, प्रत्ययान्तपर्युदासाभावे 'कृत्तद्धितसमासाश्च' इति सूत्रे कृदन्तस्य तद्धितान्तस्य च संज्ञाविधानं व्यर्थं स्यात्। ननु तस्मिन् सूत्रे अन्तग्रहणाभावात् तत्र प्रत्ययान्तस्य कथं संज्ञा ? संज्ञाविधाविति तदन्तविधिप्रतिषेधात्। तथा च कृतः, तद्धितस्य च पूर्वेण अप्रत्ययः इति अप्राप्तायाः संज्ञायाः विधानमनेन इति स्वीकार्यमिति चेन्न, अर्थवत्पदं पूर्वस्मात् सूत्राद् अत्रानुवर्तते । पूर्वसूत्रे च तस्य चारितार्थ्यन्नास्तीति अत्रावश्यमनुवृत्तिरङ्गीकार्या। पूर्वसूत्रे अर्थवतोः धातुप्रत्यययोः पर्युदासेनैव 'नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः'(परिभाषेन्दुशेखरः,प.सं.७५) इति परिभाषया अर्थवतः संज्ञा सिद्ध्यतीति तद्व्यर्थं सदुत्तरत्रानुवर्तते। किञ्च 'सुप्तिङन्तं पदम्' इति सूत्रे भाष्ये संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति परिभाषायाः ज्ञापिते सति 'कृत्तद्धितसमासाश्च' इति सूत्रेऽपि तद्धितान्तस्य संज्ञा न स्यादित्याशङ्क्य अर्थवदिति वर्तते। कृत्तद्धितान्तं चैवार्थवत्, इत्युक्तम् । अर्थवदित्यत्र प्रशंसायां मतुप् । एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वं प्रशंसामूलमिति तदन्तयोरेव संज्ञाविधानात् पूर्वसूत्रे प्रत्ययान्तपर्युदासः अवश्यं स्वीकार्यः। तथा च संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधेऽपि एतेन हास्योक्तप्रमाणेन तदन्तविधिलाभे सति गार्ग्यः, औपगवः इत्यादीनां प्रातिपदिकत्वं सिद्ध्यति।

ननु पूर्वमुक्तं प्रत्ययान्तपर्युदासे 'कृत्तद्धिते'ति सूत्रे तद्धितग्रहणं ज्ञापकम्। तत्कथं ? यतो हि वासुदेववाचकस्य अस्यापत्यम् इः, इत्यादौ केवलेऽपि तद्धितप्रत्यये प्रातिपदिकसंज्ञायाः चारितार्थ्यसम्भवादिति चेन्न। सूचितमेव पूर्वम् - 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रे धातुप्रत्ययपर्युदासेनैव अर्थवत्त्वे लब्धे अर्थवदित्यनुवृत्तिसामर्थ्यादेकार्थीभावेन लौकिके प्रयोगे प्रसिद्धरूपार्थवत्त्वस्वीकारेण तद्धितमात्रे तदसम्भवात्। अत एव 'अस्य अपत्यम् इः' इत्यत्रापि 'अ अस् इ' इत्यवस्थायामेव प्रवृत्ता या प्रातिपदिकसंज्ञा सा एकदेशविकृतन्यायेन 'इ' इत्यत्रापि अनपायात् प्रातिपदिकत्वात् स्वादयः सिद्ध्यन्ति। पूर्वमिदमप्युक्तम् 'अधातु' इति नञ्पर्युदासेन तदन्तं सिद्ध्यति। तात्पर्यन्तु इदमस्ति - पर्युदासो सदृग्ग्राही भवति। तथा च धातुभिन्नं धातुसदृशम् अर्थवदेव भवति। तत्रोच्यते - धातुप्रत्ययपर्युदासः अर्थवत्त्वं कथं प्रमाणयति ? यतो हि 'अधीते' इत्यत्र इण्धातो नित्यमधिपूर्वकत्वात् सोपसर्गस्यैवार्थबोधकत्वात्, उपसर्गरहितस्य तु अनर्थकत्वं वर्तते। एवमेव 'यावकः' इत्यनेन यावशब्दात्प्रतीयमानस्यैवार्थस्य बोधाद् अत्र कन्प्रत्ययोऽनर्थकः। तथा च अनर्थकयोः धातुप्रत्ययोरपि सत्त्वात् सादृश्यप्रतियोगितावच्छेदकव्यापकीभूतधर्मेण सादृश्यग्रहणसम्भवात् तयोः पर्युदासः अर्थवत्त्वं न गमयतीति चेन्न। धातुः अनर्थक इति न वाच्यम्, कथमिति चेत्, क्रियावाचकत्वं विना धातुसंज्ञाया अबाधात्। कन्प्रत्ययोऽपि नानर्थकः, 'द्वितीय-तृतीय-चतुर्थ-तुर्याण्यन्यतरस्याम्'(पा.सू२.२.३) इति सूत्रभाष्ये स्वार्थिकाः प्रत्ययाः प्रकृत्यर्थेनैव अर्थवन्त इति भाष्योक्तत्वात्। तथा च पूर्वसूत्रे अर्थवदिति पदं व्यर्थमेव, इदञ्च प्राचां मतम्। तथैव कृत्तद्धितसूत्रे भाष्यमुक्तमेव। अर्थवदिति वर्तते, कृत्तद्धितान्तश्चैवार्थवत्, न केवलाः कृतः तद्धिता वा इति।

ननु तत्रापि तद्धितपदं तद्धितमात्रग्राहकमिति वक्तव्यमिति चेन्न, पूर्वसूत्रे धातुप्रत्ययपर्युदासेनैवार्थवत्वे लब्धे अर्थवदित्यनुवृत्तिसामर्थ्यादेकार्थीभावेन लौकिकप्रयोगे प्रसिद्धत्वरूपार्थवत्वस्वीकारेण तद्धितमात्रे तदसम्भवात्। तथा च

भाष्यम् - "अर्थवदिति वर्तते, कृत्तद्धितान्तश्चैवार्थवत्, न केवलाः कृतस्तद्धिता वा"(महाभाष्यवचनम्, पा.सू.१.२.४६) इति। प्रत्ययान्तपर्युदासाभावे "काण्डे" इत्यादौ नपुंसकह्रस्वापत्तिः । "काण्ड इ" इति स्थिते पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे ततो लक्ष्ये लक्षणस्येति न ह्रस्व इति वाच्यम्, विकारकृतलक्ष्यभेदे तन्न्यायाप्रवृत्तेः । अन्यथा गाङो लटि आताञ्झयोः शपा सवर्णदीर्घे पुनस्तदप्रवृत्त्यापत्तिः । एवं 'चिकीर्ष अ ति' इति स्थिते शपा पररूपे पुनस्तदनुपपत्तिः स्यात् । नन्वेवं भाष्ये उदवोढामित्यत्र सकृत् हलन्त-लक्षणवृद्धौ ढत्वादीनामसिद्धत्वात्पुनरोकारस्यानेन न्यायेन कथं वृद्धिर्वारितेति चेत्, यद्धर्मावच्छिन्नस्य पूर्वकालप्राप्तिकर्तृशास्त्रबोध्यकार्यविधावुद्देश्यता तद्धर्ममात्राश्रयोद्देश्यकविकारस्यैव लक्ष्याभेदकत्वमिति स्वीकारात् । अत्र च हलन्तधात्ववयवेक्त्वमुद्देश्यतावच्छेदकम् । काण्डे इत्यत्र तु नपुंसकप्रातिपदिकान्तावयवाच्त्वस्य तत्त्वम् । विकारस्तु प्रत्ययाश्रयोऽपीति लक्ष्यभेदोऽस्त्येव ।

ननु प्रत्ययान्तपर्युदासेऽपि पूर्वान्तवत्त्वेन प्रातिपदिकत्वात् काण्डे इत्यत्र ह्रस्वः स्यादेवेति चेन्न, ह्रस्वो नपुंसके यत्तस्येति न्यासेन सिद्धे प्रातिपदिकग्रहणम् सत्त्वप्रधानकग्रहणार्थम् । स्वप्रयोज्योपस्थितिविषय-प्रकारत्वानाकान्तलिङ्गान्वय्यर्थकविशेष्यकत्वरूपतत्त्वस्यात्रासत्त्वान्न दोषः। अत एव "सप्तम्यधिकरणे च" इति निर्देशः सङ्गच्छते ।

धातुपर्युदासाभावे "अहन्" इत्यत्र नलोपापत्तिः । तिपः प्रत्ययलक्षणेनाश्रयणे प्रत्ययान्तपर्युदासो भवतीति न वाच्यम् । नलोपे कर्तव्ये प्रत्ययलक्षणेन प्रत्ययान्तत्वमादाय पर्युदासो न भवति, "न ङिसम्बुद्ध्योः"( पा.सू.८.२.८) इति सम्बुद्धिग्रहणाज्ज्ञापकात् । अत एव "राजा" इत्यादौ नलोपसिद्धिः ।

**अर्थवद्ग्रहणप्रयोजनम्**

अर्थवद्ग्रहणेन "धनम्", "वनम्" इत्यादौ प्रतिवर्णं संज्ञा न । सत्यां तु संख्यान्वयाभावेऽपि हुंफडादिभ्य इव औत्सर्गिकैकवचनं स्यादेव । तथा च "तद्धितश्चासर्वविभक्तिः" इति सूत्रे भाष्यम् -"एकवचनमुत्सर्गः करिष्यते । तस्य द्विबह्वोरर्थयोर्द्विवचनबहुवचने बाधके भविष्यतः" (महाभाष्यवचनम्,पा.सू.१.१.३८)इति । यदि भाष्य-प्रामाण्यादेकवचनमिति महासंज्ञाकरणाच्च एकमुच्यत अनेनेत्येकवचनमित्यर्थेन एकत्व एवैकवचनमिति स्वीक्रियते तदा "अथ वा आचार्यप्रवृत्तिर्ज्ञापयति, "उत्पद्यन्तेऽव्ययेभ्यः स्वादयः" इति । यदयम् "अव्ययादाप्सुपः" इत्यव्ययाल्लुकं शास्ति"(महाभाष्यवचनम्, पा.सू.१.४.२१) इति "बहुषु बहुवचनम्" इति सूत्रभाष्यप्रामाण्यादव्ययेभ्यः सोरुत्पत्तावपि न वर्णेभ्यः सा । एवं सति दश दाडिमानीत्याद्यनर्थकवाक्यस्याप्रातिपदिकत्वं अर्थवद्ग्रहणप्रयोजनम् ।

**अर्थवत्त्वस्वरूपम्**

अत्र सूत्रे दीक्षितैः वृत्तिमत्वमर्थवत्त्वमित्युक्तम् । धातुप्रत्ययपर्युदासेनैतादृशार्थवत्वे लब्धे अर्थवद्ग्रहणमुत्तरार्थम् । तथा च तत्र प्रागुक्तं प्रशस्तार्थवत्त्वं लभ्यते । तथा च संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधेऽपि तदन्तविधिलाभे "गार्ग्यः", "औपगव" इत्यादीनां प्रातिपदिकत्वं सिद्ध्यति । प्रकृतसूत्रे च एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपार्थवत्वस्य "राम" इत्यादावसम्भवात् नैतादृशार्थवत्त्वम् । एवं च सामर्थ्याच्छब्दाधिकार इत्यभिप्रायः ।

परन्तु भाष्ये "न हि गोधा सर्पन्ती सर्पणादहिर्भवति" इति शब्दाधिकारावहेलनात् नागेशेन "एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम्" इति उभयसूत्रसाधारणमर्थवत्त्वलक्षणमुक्तम् ।

एकार्थीभावेनेत्यादिरूपार्थकत्वस्वीकारे पञ्चगवधनशब्दावयवे "पञ्चगव" इत्यत्रातिव्याप्तिः । एतत्संज्ञेति स्वीकारे तु धनशब्दसापेक्षयैवार्थबोधकत्वान्न प्रातिपदिकत्वम् । सति तु प्रातिपदिकत्वे टाबापत्तिः । परत्वात् ङीप्तु न, "टिड्ढाणञ्-"(पा.सू.४.१.१५), "द्विगोः"(पा.सू.४.१.२१) इत्यत्र अनुपसर्जनाधिकारात्।

न च धनशब्दापेक्षसमासापेक्षटचो बहिरङ्गत्वेनासिद्धत्वान्न टाबिति वाच्यम्, "नलोपः सुप्स्वर-"(पा.सू.८.२.२) इति सूत्रे कृतितुग्ग्रहणात् परम्परया बहिरङ्गत्वानाश्रयणात् । अन्यथा वृत्रहभ्यामित्यादौ बहिर्भूतभ्याम्प्रत्ययनिमित्तकपदसंज्ञानिमित्तकनलोपस्य बहिरङ्गत्वेनासिद्धत्वात्तुकोऽप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव । किञ्च "गोस्त्रियोरुपसर्जनस्य"(पा.सू.१.२.४८) इति सूत्रे "तादर्थ्यात्ताच्छब्द्यं भविष्यति"(महाभाष्यवचनम्पा.सू.१.२.४८) इत्युक्तत्वात् "समासान्ताः"(पा.सू.५.४.६८) इत्यत्र समासपदं तदर्थालौकिकविग्रहवाक्यपरमिति गम्यते । तथा च समाससंज्ञाप्रवृत्तिकाल एव टच्, न तु तदनन्तरमिति टचो न बहिरङ्गत्वम् । अत एव भाष्ये "समासान्ताः" इत्यत्रान्तग्रहणप्रयोजनावसरे "निर्धुरः" इत्यत्र तत्पुरुषसमासेऽव्ययप्रकृतिस्वरः प्रयोजनमित्युक्तं सङ्गच्छते । अन्यथा पूर्वं "तत्पुरुषे तुल्यार्थ-"(पा.सू.६.२.२) इति स्वरे ततः "ऋक्पूर-"(पा.सू.५.४.७४) इत्यप्रत्यये तद्विशिष्टस्य स्वरो दुर्लभ एवेति भाष्योक्तेरसङ्गत्यापत्तिः । किञ्च यदि समासानन्तरं टच् तर्हि पूर्वोत्तरपदयोरानन्तर्यमाश्रित्य प्रवृत्तष्टच् टाप्रापणद्वारा आनन्तर्यविघातको न भवतीति सन्निपातपरिभाषयैव टाब् वार्येतेति टाबत्र दुर्वारः । न च टापि सत्यपि "गोस्त्रियो-" इति ह्रस्वत्वे न दोष इति वाच्यम्, उपसर्जनस्त्रीप्रत्ययान्तोत्तरपदद्धटितसमासस्यैव ह्रस्वप्रवृत्तेः । अत एव "राजकुमारीपुत्र" इत्यत्र न ह्रस्वः ।

ननु पञ्चगव इत्यत्र प्रत्ययान्तत्वादर्थवत्सूत्रेण न प्रातिपदिकत्वम् । यस्य प्रातिपदिकसंज्ञा चिकीर्षिता तत्मात्रवृत्तिरेकार्थीभावो गृह्यते यदि तदा केवलपञ्चगव इत्यत्र तदसत्वादुत्तरसूत्रेणापि न प्रातिपदिकत्वम्, इति चेत् सत्यम् । तथापि भाष्ये अप्रत्ययग्रहणम् अधातुग्रहणञ्च प्रत्याख्यातम् । तथा हि-"अप्रत्यय इति शक्यमवक्तुम् । कस्मान्न भवति "काण्डे", "कुड्ये" इति । कृत्तद्धितग्रहणं नियमार्थं भविष्यति । 'कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति इति" इति प्रकृतसूत्रे भाष्यम् । धातोः प्रत्ययान्तस्य चेत्तर्हि कृत्तद्धितान्तस्यैव इति नियमः । "भिद्" "छिद्" इत्यादौ प्रत्ययलक्षणेन कृदन्तत्वान्न दोषः । अहन् इत्यत्रापि प्रत्ययलक्षणे कृदन्तत्वाभावान्न दोषः । न चैवं "राजन्" इत्यत्र प्रत्ययलक्षणेन संज्ञानुपपत्तिरिति वाच्यम् न ङिसम्बुद्ध्योरिति सम्बुद्धिग्रहणबलात् कृत्तद्धितेतरश्रूयमाणप्रत्ययविषयको नियम इति स्वीकारेणादोषात् । सम्बुद्धिग्रहणात् प्रत्ययान्तविषय एवं स्वीकारो न धातुविषये । तथा चेदानीं "पञ्चगव" इत्यत्र प्रातिपदिकत्वं दुर्वारम् ।

किञ्च वृत्तिमत्त्वरूपार्थवत्त्वस्वीकारे अत्रार्थवद्ग्रहणस्य प्रत्ययेषु अतिव्याप्तिदानातिरिक्तं फलं नास्ति । धातुप्रत्ययपर्युदासेनैवार्थवत्त्वे लब्धे तद्ग्रहणस्य "इह किञ्चित् त्रपो" इति न्यायेन फलकथनस्यावश्यकतया तदसम्भवादुत्तरसूत्र एव तद्ग्रहणं कुर्यात् । न च नञिवयुक्तन्यायानित्यत्वज्ञापनार्थं तत् । तेन "वाक्क्" इत्यादौ हल्परकत्वाभावेऽपि द्वित्वं सिद्ध्यति । न्यायप्रवृत्तौ तु अज्भिन्नाच्सदृशहलि द्वित्वमित्यर्थे द्वित्वं न स्यादिति वाच्यम्, "अनचि च"(पा.सू.८.४.४७) इत्यत्र प्रतिषेध एव न तु पर्युदासः । यद्यपि "अनचि च" इत्यत्र भाष्ये "नायं प्रसज्यप्रतिषेधः, अचि न इति, किं तर्हि ? पर्युदासोऽयं यदन्यदव इति"(महाभाष्यवचनम्, पा.सू.८.४.४७) इति पठ्यते किन्तु कैयटः "लेखकप्रमादोऽयं । वस्तुतस्तु "नायं पर्युदासो, यदन्यदच इति, किं तर्हि ? प्रसज्यप्रतिषेधोऽयं, "अचि न" इति"

इत्यभिप्रैति । इदमेव युक्तमिति च भाति । भाष्ये अवसाने द्वे भवत इति वक्तव्यम् । वाक वाक्क् । त्वक् त्वक्क् । स्रुक् स्रुक्क् । "तत्तर्हि वक्तव्यम् न वक्तव्यम्" इति "अवसाने च" इति वार्तिकप्रत्याख्यानात् ।

एतत्संज्ञेति स्वीकारे तु केवलप्रत्ययस्यानर्थकत्वात्तत्पर्युदासाकारणरूपलाघवं भवति । तथा हि वाक्यपदीय उक्तम् हरिणा -

धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते ।

कृत्तद्धितानामर्थश्च केवलानामलौकिकः ॥ (वाक्यपदीयम्. २.२११)

प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते इति ।

किञ्च भाष्ये "देवदत्तो गार्ग्य" इत्यत्र तद्धितान्तत्वात्प्रातिपदिकत्वमाशङ्क्य प्रत्ययग्रहणपरिभाषया वारणं कृतम् । परन्तु दीक्षितमते तत्र एकार्थीभावाभावात्प्राप्तिरेव नास्तीति भाष्यविरोधः ।

एतत्संज्ञेत्याद्यर्थवत्त्वे स्वीकृते तु न दोषः । एतत्संज्ञेत्यस्य यद्रूपविशिष्टस्य या संज्ञा चिकीर्षिता तत्फलभूतेत्यर्थः । तथा चार्थवत्सूत्रेण न संज्ञा । गार्ग्य इत्यत्र तद्धितान्तत्वप्रयुक्तसंज्ञाफलभूतविभक्त्यपेक्षासत्त्वात्. "देवदत्तो गार्ग्यः" इत्यस्य अर्थवत्सूत्रसाध्यसंज्ञाफलभूतविभक्तीतरकृत्तद्धितसूत्रविहित-संज्ञाफलभूत-विभक्तिसमभिव्याहारापेक्षयैवार्थवत्त्वात् । उत्तरसूत्रेण तु प्राप्तिरस्तीति कृत्वा प्रत्ययग्रहण-परिभाषया समाधानपरभाष्यविरोधो न ।

नन्वेतत्पक्षे खट्वेत्यादिनित्यस्त्रीलिङ्गस्थले विभक्तीतरटाबपेक्षा वर्तत इति अर्थवत्त्वाभावादप्रातिपदिकत्वे टाबनुपपत्तिः । टाबस्तु त्रिलिङ्गे शब्दे चारितार्थ्यम् । "एधाञ्चक्रे" इत्यत्र अनुप्रयुज्यमानकृञ्धात्वपेक्षास्ति । तथा च प्रातिपदिकत्वाभावे विभक्त्यनुत्पत्त्या "पदस्य",(पा.सू.८.१.१६) "पदात्"(पा.सू.८.१.१७) इति विधीयमानः "तिङ्ङतिङः"(पा.सू.८१.२८) इति निघातो न स्यात् । किञ्च रामोऽस्तीत्यादौ "तिङ्समानाधिकरणे प्रथमा"(कात्यायनवार्तिसकम्, सं-१५२५) इति वार्तिकबलात् तिङ्समभिव्याहारेणैव लोकेऽर्थवत्त्वात्संज्ञाया अप्राप्तौ "राम" इत्यस्मात्प्रथमानुपपत्तिः । "उप्त्रिमम्", "कृत्रिमम्" इत्यादौ "क्त्रेर्मम्नित्यम्"(पा.सू.४.४.२०) इति नित्यग्रहणाद् मप्समभिव्याहारेणैवार्थवत्त्वात् प्रातिपदिकत्वाभावे मप् न स्यात् । एवं "साङ्कुटिनम्" इत्यत्र इनुण्णन्तस्यार्थवत्त्वे "अणिनुणः"(पा.सू.५.४.१५) इति स्वार्थिकाणोऽपेक्षासत्त्वेन संज्ञाऽप्रवृत्त्या अणनापत्तिः इति दोषबाहुल्यं भवति इति चेत्- एतत्संज्ञाफलभूतविभक्तीतरेत्यत्र विभक्तिपदेन स्वप्रकृतिकप्रत्ययस्य ग्रहणम् , तथा च खट्वा, उप्त्रिमम्, साङ्कूटिनम् इत्यादौ तत्प्रकृतिकप्रत्ययेतरसमभिव्याहारापेक्षाभावान्न दोषः । विभक्तीतरेत्यत्र इतरपदमितरप्रत्ययपरम् । तथा च एधामित्यादौ विभक्तीतरप्रत्ययसमभिव्याहारापेक्षाभावादर्थवत्त्वम् । नन्वेवं "पञ्चगव" इत्यत्रापि प्रातिपदिकत्वापत्तिरिति चेत् सत्यम्, लक्षणे स्वघटितसमास-घटकदलनिवेशान्न दोषः । अत्र स्वघटितसमासः "पञ्चगवधन" इति । तद्घटकधनशब्दसापेक्षत्वेनैव लोके अर्थवत्त्वादस्य नार्थवत्त्वम् । तथा च अत्र सूत्रे उत्तरसूत्रे च "एतत्संज्ञाफलभूतस्वनिष्ठप्रकृतितानिरूपित-प्रत्ययत्ववदितरप्रत्ययस्वघटितसमासघटकसमभिव्याहारानपेक्षया लोके अर्थविषयकबोध-जनकत्वम्" अर्थवत्त्वमिति ।

**प्राचीनमतखण्डनम्, नवीनमतस्थापनञ्च**

दीक्षिताभिप्रायो वर्तते, अर्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रे धातुप्रत्ययपर्युदासकरणाद् वृत्तिमत्त्वरूपमर्थवत्त्वं गृह्यते । उत्तरसूत्रे च "न केवलाः कृतस्तद्धिता वाऽर्थवन्तः" इति भाष्योक्ते प्रमाणे

शब्दाधिकारमाश्रित्य "एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धरूपमर्थवत्त्वम्" अङ्गीक्रियत इति । परन्तु भाष्ये शब्दाधिकारस्वीकारे 'न हि गोधा सर्पन्ती सर्पणादहिर्भवति' इति शब्दाधिकारावहेलनात् नागेशेन पूर्वसूत्रे वृत्तिमत्त्वरूपार्थवत्त्वस्वीकारे, उत्तरसूत्रे च उपर्युक्त एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धार्थवत्त्वस्वीकारेऽर्थवत्त्वद्वयेऽर्थवत्पदस्य शक्तिद्वयम्, उपस्थितिद्वयम्, शाब्दबोधद्वयम्, शब्दाधिकारकल्पना, विभिन्नयोग्यतादिरूपकारणाधिक्यञ्चेति गौरवं पर्यालोच्यार्थवत्सूत्रे धातुप्रत्ययपर्युदासेनैव सामान्यवृत्तिमत्त्वरूपार्थवत्त्वलाभे पुनः अर्थवद्ग्रहणसामर्थ्यात् पूर्वोत्तरसूत्रद्वयेऽपि एकविधमेवार्थवत्त्वमङ्गीक्रियते। तच्चार्थवत्त्वं कीदृगिति जिज्ञासायामुक्तं नागेशेन "अत्र सूत्रे उत्तरसूत्रे चार्थवत्त्वम्, एतत्संज्ञाफलभूत-विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वरूपमिति"(अर्थवत्सूत्रशेखरः)। प्रत्ययमात्रे तदर्थो न सम्भवतीति भाष्यप्रामाण्याच्च तत्त्वम्।

तद्यथा रामशब्दस्यार्थवत्त्वं चिकीर्षितं चेदेतस्य रामशब्दस्य भाविनी या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः तदितरो घटपटादिः, तत्समभिव्याहारानपेक्षयैव लोके दशरथापत्याद्यर्थविषयकबोधजनकत्वरूपमर्थवत्वं रामशब्देऽस्तीति लक्षणसमन्वयः।

अत्र यद्यपि स्वादिप्रकृतिमात्रस्य रामादेर्न बोधजनकत्वन्तथापि सम्भावितन्तत्तत्रास्त्येवेति न लक्षणानुपपत्तिः। एवञ्च ईदृशार्थवत्त्वस्वीकारे 'रामेषु' इत्यादौ सुपः या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः, तदितरप्रकृतिभूतः रामशब्दः, तत्समभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वात् सुपः अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञावारणसम्भवे प्रत्ययपर्युदासकरणरूपमर्थ-वत्त्वद्वयकल्पनरूपमुपस्थितिद्वयकल्पनरूपञ्च गौरवं नागेशमते न भवतीति महल्लाघवम्।

तत्तर्हि जिज्ञास्यतेऽत्र लक्षणे विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमित्येतावतैव रामादीनामर्थवत्त्वे सिद्धे विभक्तावेतत्संज्ञाफलभूतत्वमिति विशेषणमनावश्यकमिति तु नाशङ्कनीयम्, तथा सति 'राज्ञः पुरुषः' इत्येतद्घटकीभूतो यो राज्ञः पुरुषेति समुदायस्तस्यार्थवत्त्वेन प्रातिपदिकत्वात् सुपो धातुप्रातिपदिकयोरिति सूत्रेण राजप्रकृतिकविभक्तेलुगापत्तेः। दत्ते च विशेषणे राज्ञः पुरुषेत्यस्य समुदायस्य या चिकीर्षिता प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिः समुदायादुत्पत्स्यमाना स्वादिविभक्तिः,तदितरा पुरुषप्रकृतिका सुविभक्तिः तत्समभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेनार्थवत्त्वाभावादेव प्रातिपदिकत्त्वाऽभावेन न सुपः लुगापत्तिः । अत्र लक्षणे नञर्थद्वयोपादानाभावेऽपि लक्ष्यभूतानां रामादीनामर्थवत्त्वसिद्धौ राज्ञः पुरुषेत्याद्यलक्ष्याणां तदभावसिद्धेश्च गुरुभूतलक्षणमप्रयोजकमिति न शङ्क्यम्, तर्हि लिट्-धुक्-दधि-मध्वित्यादौ विभक्तिसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वेनार्थवत्त्वाभावात् प्रातिपदिकत्वानुपपत्तिः स्यादतस्तेषामर्थवत्त्वसिद्धये नञर्थद्वयोपादानं शेखरकृतादृतम् । नञर्थद्वयोपादाने तु एतत्पदेन दधि, मधु, इत्यादि ग्राह्यम्। तस्य या प्रातिपदिकसंज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः, तदितरो घटपटादिः, तत्समभिव्याहारानपेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेनार्थवत्त्वं सिद्ध्यति । तथैव लक्षणघटकसमभिव्याहारपदमपि नोपेक्षणीयम्, यतो लक्ष्यभूतानां रामादीनामपि अर्थवत्त्वानापत्तिः स्यात् । यथा एतस्य रामशब्दस्य या प्रातिपदिकसज्ञा तत्फलभूता विभक्तिरुत्पत्स्यमाना स्वादिविभक्तिः, तदितराऽस्त्यादिक्रिया, तदपेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेन तेषामर्थवत्त्वं संसिद्धम्।

अर्थवत्त्वलक्षणे समभिव्याहारो नाम नियतपूर्वापरीभावः। एवञ्च घटोऽस्ति । अस्ति घटः इत्यादि अस्त्यादिक्रियाविषये नियतसमभिव्याहारनियमाभावेन नास्त्यादीनां समभिव्याहारः स्वीकृतः। तथैव लोक इति लक्षणघटकेन प्रत्ययेषु प्रातिपदिकत्त्वप्रयोजकमर्थवत्त्वं निवार्यते, यतो हि शास्त्रेषु तु प्रत्ययानां सर्वत्र प्रकृतिसमभिव्याहारानपेक्षयापि शास्त्रीयमर्थवत्त्वमस्त्येव । 'कर्तरि कृत् (पा.सू.३.४.६७), 'तयोरेव कृत्यक्तखलर्थाः'(पा.सू.३.४.७०) 'अकर्तरि च कारके संज्ञायाम्'(पा.सू.३.३.१९)इत्यादीनि पाणिनिसूत्राण्येव तत्र मानमतस्तन्निवारणार्थं लोक-इति पदं सार्थकम् । तदुपादाने तु लौकिकवाक्ये प्रत्ययानां कुत्रचिदपि प्रकृत्यनपेक्षणाल्लौकिककार्यविषयक-बोधजनकत्वाभावेन प्रत्ययमात्रे न तादृशार्थापत्तिः ।

'एधाञ्चक्रे' इत्यादौ एधामित्यर्थवत्त्वाभावेन प्रातिपदिकत्वाभावात् पदत्वाभावेन 'वा पदान्तस्ये'(पा.सू.८.४.५९)ति पाणिनीयसूत्रस्याप्रवृत्तेः वैकल्पिकपरसवर्णो न स्यादन्यच्च 'तिङ्ङतिङः' इति सूत्रेण विहितं यदतिङन्तपदात् परस्य तिङन्तस्य निघातस्तदपि न स्यात् । एतदर्थमेतत्संज्ञाफलभूतपदेतरो यो विभक्तीतरः, तत्समभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वशरीरं वक्तव्यं दृश्यते । 'एधाञ्चक्रे' इत्यत्र समाविष्टस्य 'चक्रे' इत्यस्य तु एतत्पदग्राह्य-एधामिति समुदायस्य चिकीर्षिता या प्रातिपदिकसंज्ञा तत्फलभूतोत्पत्स्यमानस्वादिविभक्तीतरत्वेऽपि पदेतरत्वाभावेन न कश्चन दोषः, यथा पदेतरः कश्चन घटपटादिः, तत्समभिव्याहारानपेक्षयैव लोकेऽर्थविषयकबोधजनकत्त्वेनार्थवत्त्वात् प्रातिपदिकत्वं सिद्ध्यति ।

अत्र लोकेऽर्थविषयकबोधजनकत्वमित्येतावदेवार्थवल्लक्षणमस्ति । अन्योंऽशस्तूपलक्षणं न तु अर्थवल्लक्षणे प्रविष्टमिति कृत्वा महल्लाघवमागतम् ।

**निष्कर्षः**

वाक्यार्थज्ञाने वाक्यघटक-पदपदार्थयोर्ज्ञानं कारणमिति नियमेनार्थवदधातुरप्रत्ययः प्रातिपदिकमिति सूत्रस्य शाब्दबोधस्तदा संभवति यदा तत्रत्यानां सर्वेषां वाक्यघटकपदानामर्थाः तन्निष्ठा शक्तिधीश्च भवेत् । यद्यपि सर्वाण्यपि कारकसूत्राणि नियमपरकाण्येव, स्वादिविधौ प्रातिपदिकाधिकारात् "स्वौजसमौट्"(पा.सू.४.१.२), सूत्रेणैव प्रत्ययसिद्धेः । एतावता यथा कर्मगते एकत्वे द्वितीयाया एकवचनं भवतीति-"कर्मणि द्वितीया" इति सूत्रस्यार्थः । तथैव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा सूत्रस्यार्थोऽपि प्रातिपदिकार्थगते एकत्वे प्रथमाया एकवचनमिति क्रमेण फलति । अन्यच्च महासंज्ञानुरोधेन एकं वक्तीति एकवचनमित्यर्थात् प्रमाणसद्भाव एवौत्सर्गिकैकवचनप्रवृत्तेः । प्रत्ययरूपप्रातिपदिकार्थे लिङ्गसंख्यादेरभावेनैव विभक्त्युत्पत्तेरसम्भवः । एवञ्च पूर्वोक्तयोरुभयोः सूत्रयोर्घटकस्यार्थवत्पदस्य वृत्तिमत्त्वरूपसाधारणार्थोऽपि स्वीकर्तुं सम्भवः । तत्र प्रत्ययपर्युदासोऽपि नावश्यकस्तथापि "कृत्तद्धितान्तञ्चैवार्थवन्नकेवला कृतस्तद्धिता वे"ति भाष्याभिप्रायेण कृत्तद्वितान्तमेवार्थवत्प्रातिपदिकं भवति, केवलाः कृतस्तद्धिता वा अर्थवन्तोऽपि न प्रातिपदिकसंज्ञका इत्यर्थात् । तत्र च तादृशस्य वृत्तिमत्त्वस्य केवलप्रत्ययेऽपि सत्त्वेन भाष्यविरोधः स्पष्ट एव । अत एव नागेशोक्तलक्षणमेव ज्याय इति विवेकः । यथा तत्र सूत्रघटकोऽर्थवत्पदे (अर्थ मतुप्) क्रमेण प्रकृतिप्रत्ययौ स्तः । तदनु सम्मिलितस्यैकार्थीभावयुतस्यार्थवत्पदस्यार्थः प्राचीनवैयाकरणानां मतेऽर्थवत्सूत्रे वृत्तिमत्स्वरूपः, अथ च कृत्तद्धितसमासाश्चेति सूत्रे एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धार्थकत्त्वरूपः स्वीक्रियते । अतस्तत्र पूर्वोत्तरसूत्रद्वयेऽर्थवत्पदस्य शक्तिद्व्यकल्पनाशब्दाधिकारकल्पनाप्रत्ययपर्युदासकल्पनाप्रभृतिगौरवमालोचयता श्रीनागेशभट्टेनोक्तसूत्रद्वये एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्त्वरूपमेव

परिष्कृतम् । कैयटेनापि लौकिकार्थप्रत्यासन्नोऽभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते स आश्रीयत इति व्याख्यानेन स्वाभिप्रायः समुद्गीर्णः। एतच्च न केवलप्रत्यये, प्रत्ययस्य प्रातिपदिकसंज्ञाफलभूतविभक्तीतरप्रकृति-समभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वादिति "हरिषु" इत्यादौ सोः प्रातिपदिकत्वाप्राप्त्या तद्वारणाय "अप्रत्ययः" इति पर्युदासो न कर्तव्य इत्यपि लाघवमिति ।

**सन्दर्भग्रन्थसूची**


नागेशः (ई.१९२५), *वैयाकरणसिद्धान्तलघुमञ्जूषा*, (कलासमवेता), विद्याविलासप्रकाशनम् ।

नागेशः (ई.१९९८), *लघुशब्देन्दुशेखरः* (षड्व्याख्यासमन्वितः), चौखम्बासुरभारतीप्रकाशनम् ।

नागेशः (ई.२०१५), *लघुशब्देन्दुशेखरः*, चौखम्बाप्रकाशनम् ।

पतञ्जलिः (ई.२०२१), *महाभाष्यम्* (प्रदीपोद्योतसमवेतम्), चौखम्बासुरभारतीप्रकाशनम् ।

भट्टोजिदीक्षितः(ई.१९९६), *सिद्धान्तकौमुदी* (लक्ष्मीव्याख्यासमन्विता) मोतीलालबनारसीदासः ।

भट्टोजिदीक्षितः(वि.सं.२०५०), *सिद्धान्तकौमुदी* (लक्ष्मीव्याख्यासमन्विता) मोतीलालबनारसीदासः ।

भट्टोजिदीक्षितः(वि.सं.२०७५), *प्रौढमनोरमा* (शब्दरत्नभूषिता), चौखम्बासंस्कृतभवनम् ।

भट्टोजिदीक्षितः (वि.सं.२०६७), *सिद्धान्तकौमुदी*, (तत्त्वबोधिनीबालमनोरमाभूषिता), चौखम्बासुरभारती-प्रकाशनम् ।

भर्तृहरिः (ई.१९९१), *वाक्यपदीयम्*, (प्रकाशाम्बाकर्त्रीसमवेतम्), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।